International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(6): 150-154
© 2022 IJSR
www.anantaajournal.com
Received: 06-09-2022
Accepted: 12-10-2022

**डॉ. धर्मेश शर्मा**
ऐसिस्टैण्ट प्रोफैसर, संस्कृतविभागः, नेहरू मैमोरियल शिव नारायण दास स्नातकोत्तर महाविद्यालय, बदायूँ, उत्तर प्रदेश, भारत

**Corresponding Author:**
**डॉ. धर्मेश शर्मा**
ऐसिस्टैण्ट प्रोफैसर, संस्कृतविभागः, नेहरू मैमोरियल शिव नारायण दास स्नातकोत्तर महाविद्यालय, बदायूँ, उत्तर प्रदेश, भारत

# श्रीमद्भगवद्गीतायाः चतुर्थाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शः

**डॉ. धर्मेश शर्मा**

**सारांशः**
श्रीमद्भगवद्गीताया विषये किञ्चिदपि कथनं सूर्याय दीपदर्शनमिव भविष्यति अतस्तस्या विषये कस्याश्चिदपि भूमिकाया उत्त्थापनं विनैव शोधपत्रशीर्षकस्य कार्यं प्रारभ्यते। अस्मिन् शोधपत्रे श्रीमद्भगवद्गीतायाः चतुर्थाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शोऽत्र प्रस्तूयते।

**कूटशब्दाः** श्रीमद्भगवद्गीतायाः, चतुर्थाध्यायस्य, तिङन्तपदानाम्, व्याकरणात्मकः, प्रकृतिप्रत्ययप्रक्रियाविमर्शः।

## प्रस्तावना
श्रीमद्भगवद्गीताया विषये किञ्चिदपि कथनं सूर्याय दीपदर्शनमिव भविष्यति अतस्तस्या विषये कस्याश्चिदपि भूमिकाया उत्त्थापनं विनैव शोधपत्रशीर्षकस्य कार्यं प्रारभ्यते। अस्मिन् शोधपत्रे श्रीमद्भगवद्गीतायाः चतुर्थाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शोऽत्र प्रस्तूयते।

## श्रीमद्भगवद्गीतायाः चतुर्थाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शः–
तत्र तावत्–

**विदुः** विद् इत्ययं धातुः– विद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण विद् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– विद् झि, 'विदो लटो वा' (अष्टाध्यायीसूत्रपाठः 3/4/83) इत्यनेन सूत्रेण झि इत्यस्य स्थान उस् इत्ययमादेशः– विद् उस्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण विद् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– विद् शप् उस्, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– विद् उस्, रुत्वम्, विसर्गः– विद् उः– विदुः।
असि– अस् इत्ययं धातुः– अस्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण अस् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– अस् सि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण अस् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– अस् शप् सि, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– अस् सि, 'तासस्त्योर्लोपः' (अष्टाध्यायीसूत्रपाठः 7/4/50) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– अ सि– असि।
विजानीयाम्– वि इत्युपसर्गपूर्वको ज्ञा इत्ययं धातुः– वि ज्ञा, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण ज्ञा इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् इत्ययं प्रत्ययः– वि ज्ञा मिप्, 'तस्थस्थमिपां तान्तन्तामः' (अष्टाध्यायीसूत्रपाठः 3/4/101) इत्यनेन सूत्रेण मिप् इत्यस्य स्थाने अम् इत्ययमादेशः– वि ज्ञा अम्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण अम् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– वि ज्ञा यास् अम्, 'क्र्यादिभ्यः श्ना' (अष्टाध्यायीसूत्रपाठः 3/1/81) इत्यनेन सूत्रेण ज्ञा इत्यस्मात् परः श्ना (ना) इत्ययं प्रत्ययः– वि ज्ञा ना यास् अम्, 'ज्ञाजनोर्जा' (अष्टाध्यायीसूत्रपाठः 7/3/79) इत्यनेन सूत्रेण ज्ञा इत्यस्य स्थाने जा इत्ययमादेशः– वि जा ना यास् अम्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– वि जा ना या अम्, 'ई हल्यघोः' (अष्टाध्यायीसूत्रपाठः 6/4/113) इत्यनेन सूत्रेण आ इत्यस्य स्थान ई इत्ययमादेशः–

वि जा न् ई या अम्, 'अकः सवर्णे दीर्घः' (अष्टाध्यायीसूत्रपाठः 6/1/97) इत्यनेन सूत्रेण आ अ इत्यनयोः स्थाने दीर्घसंज्ञकः (आ) इत्ययमेकादेशः– वि जा न् ई य् आ म्– विजानीयाम्।

वेत्थ– विद् इत्ययं धातुः– विद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण विद् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् इत्ययं प्रत्ययः– विद् सि, 'विदो लटो वा' (अष्टाध्यायीसूत्रपाठः 3/4/83) इत्यनेन सूत्रेण सिप् इत्यस्य स्थाने थल् (थ) इत्ययमादेशः– विद् थ, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण विद् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– विद् शप् थ, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– विद् थ, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– व् ए द् थ, 'खरि च' (अष्टाध्यायीसूत्रपाठः 8/4/54) इत्यनेन सूत्रेण द् इत्यस्य स्थाने चर् (त्) इत्ययमादेशः– व् ए त् थ– वेत्थ।

सम्भवामि– सम् इत्युपसर्गपूर्वको भू इत्ययं धातुः– सम् भू, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण भू इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् (मि) इत्ययं प्रत्ययः– सम् भू मि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भू इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– सम् भू अ मि, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– सम् भ् ओ अ मि, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ओ इत्यस्य स्थाने अव् इत्ययमादेशः– सम् भ् अव् अ मि, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– सम् भ् अव् आ मि, 'मोऽनुस्वारः' (अष्टाध्यायीसूत्रपाठः 8/3/23) इत्यनेन सूत्रेण म् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– सं भ् अव् आ मि, 'वा पदान्तस्य' (अष्टाध्यायीसूत्रपाठः 8/4/58) इत्यनेन सूत्रेण अनुस्वारस्य () इत्यस्य स्थाने परसवर्णः (म्) इत्ययमादेशः– स म् भ् अव् आ मि– सम्भवामि।

सृजामि– सृज् इत्ययं धातुः– सृज्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण सृज् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् (मि) इत्ययं प्रत्ययः– सृज् मि, 'तुदादिभ्यः शः' (अष्टाध्यायीसूत्रपाठः 3/1/77) इत्यनेन सूत्रेण सृज् इत्यस्मात् परः श (अ) इत्ययं प्रत्ययः– सृज् अ मि, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– सृज् आ मि– सृजामि।

एति– इ इत्ययं धातुः– इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण इ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– इ ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण इ इत्यस्मात् परः शप् इत्ययं प्रत्ययः– इ शप् ति, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– इ ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– ए ति– एति।

प्रपद्यन्ते– प्र इत्युपसर्गपूर्वकः पद् इत्ययं धातुः– प्र पद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण पद् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– प्र पद् झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– प्र पद् झ् ए, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण पद् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– प्र पद् य झ् ए, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– प्र पद् य अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– प्र पद् य् अ न्त् ए– प्रपद्यन्ते।

भजामि– भज् इत्ययं धातुः– भज्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण भज् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् (मि) इत्ययं प्रत्ययः– भज् मि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भज् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– भज् अ मि, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– भज् आ मि– भजामि।

अनुवर्तन्ते– अनु इत्युपसर्गपूर्वको वृत् इत्ययं धातुः– अनु वृत्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण वृत् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– अनु वृत् झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– अनु वृत् झ् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण वृत् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अनु वृत् अ झ् ए, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– अनु वृत् अ अन्त् ए, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– अनु व् अर् त् अ अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– अनु व् अर् त् अ न्त् ए– अनुवर्तन्ते।

यजन्ते– यज् इत्ययं धातुः– यज्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण यज् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– यज् झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– यज् झ् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण यज् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– यज् अ झ् ए, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– यज् अ अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– यज् अ न्त् ए– यजन्ते।

लिम्पन्ति– लिप् इत्ययं धातुः– लिप्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण लिप् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– लिप् झि, 'तुदादिभ्यः शः' (अष्टाध्यायीसूत्रपाठः 3/1/77) इत्यनेन सूत्रेण लिप् इत्यस्मात् परः श (अ) इत्ययं प्रत्ययः– लिप् अ झि, 'शे मुचादीनाम्' (अष्टाध्यायीसूत्रपाठः 7/1/59) इत्यनेन सूत्रेण इ इत्यस्मात् परो नुम् (न्) इत्ययमागमः– ल् इ न् प् अ झि, 'नश्चापदान्तस्य झलि' (अष्टाध्यायीसूत्रपाठः 8/3/24) इत्यनेन सूत्रेण न् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– ल् इं प् अ झि, 'अनुस्वारस्य ययि परसवर्णः' (अष्टाध्यायीसूत्रपाठः 8/4/57) इत्यनेन सूत्रेण अनुस्वारस्य () इत्यस्य स्थाने परसवर्णः (म्) इत्ययमादेशः– ल् इ म् प् अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– ल् इ म् प् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– ल् इ म् प् अ न्त् इ– लिम्पन्ति।

अभिजानाति– अभि इत्युपसर्गपूर्वको ज्ञा इत्ययं धातुः– अभि ज्ञा, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण ज्ञा इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– अभि ज्ञा ति, 'क्र्यादिभ्यः श्ना' (अष्टाध्यायीसूत्रपाठः 3/1/81) इत्यनेन सूत्रेण ज्ञा इत्यस्मात् परः श्ना (ना) इत्ययं प्रत्ययः– अभि ज्ञा ना ति, 'ज्ञाजनोर्जा'

(अष्टाध्यायीसूत्रपाठः 7/3/79) इत्यनेन सूत्रेण ज्ञा इत्यस्य स्थाने जा इत्ययमादेशः– अभि जा ना ति– अभिजानाति।

बध्यते– बन्ध् इत्ययं धातुः– बन्ध्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण बन्ध् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– बन्ध् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– बन्ध् त् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण बन्ध् इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– बन्ध् य त् ए, 'अनिदितां हल उपधायाः क्ङिति' (अष्टाध्यायीसूत्रपाठः 6/4/24) इत्यनेन सूत्रेण न् इत्यस्य लोपसंज्ञकमदर्शनम्– ब ध् य त् ए– बध्यते।

प्रवक्ष्यामि– प्र इत्युपसर्गपूर्वको वच् इत्ययं धातुः– प्र वच्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण वच् इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् (मि) इत्ययं प्रत्ययः– प्र वच् मि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण वच् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– प्र वच् स्य मि, 'चोः कुः' (अष्टाध्यायीसूत्रपाठः 8/2/30) इत्यनेन सूत्रेण च् इत्यस्य स्थाने क् इत्ययमादेशः– प्र व क् स्य मि, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने ष् इत्ययं मूर्धन्यादेशः– प्र व क् ष् य मि, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– प्र व क् ष् य् आ मि– प्रवक्ष्यामि।

मोक्ष्यसे– मुच् इत्ययं धातुः– मुच्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण मुच् इत्यस्मात् परो लृट् लकारः, आत्मनेपदम्, मध्यमपुरुषः, एकवचनम्, थास् इत्ययं प्रत्ययः– मुच् थास्, 'थासः से' (अष्टाध्यायीसूत्रपाठः 3/4/80) इत्यनेन सूत्रेण थास् इत्यस्य स्थाने से इत्ययमादेशः– मुच् से, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण मुच् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– मुच् स्य से, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– म् ओ च् स्य से, 'चोः कुः' (अष्टाध्यायीसूत्रपाठः 8/2/30) इत्यनेन सूत्रेण च् इत्यस्य स्थाने क् इत्ययमादेशः– म् ओ क् स्य से, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने ष् इत्ययं मूर्धन्यादेशः– म् ओ क् ष् य से– मोक्ष्यसे।

पश्येत्– दृश् इत्ययं धातुः– दृश्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण दृश् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– दृश् ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– दृश् त्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण त् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– दृश् यास् त्, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– दृश् यास् स् त्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण दृश् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– दृश् अ यास् स् त्, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यच्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण दृश् इत्यस्य स्थाने पश्य् इत्ययमादेशः– पश्य् अ यास् स् त्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लोपसंज्ञकमदर्शनम्– पश्य् अ या त्, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थान इय् इत्ययमादेशः– पश्य् अ इय् त्, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– पश्य् ए य् त्, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 6/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– पश्य् ए त्– पश्येत्।

करोति– कृ इत्ययं धातुः– कृ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण कृ इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– कृ ति, 'तनादिकृञ्भ्य उः' (अष्टाध्यायीसूत्रपाठः 3/1/79) इत्यनेन सूत्रेण कृ इत्यस्मात् पर उ इत्ययं प्रत्ययः– कृ उ ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– क् अर् उ ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– क् अर् ओ ति– करोति।

निबध्यते– नि इत्युपसर्गपूर्वको बन्ध् इत्ययं धातुः– नि बन्ध्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण बन्ध् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– नि बन्ध् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– नि बन्ध् त् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण बन्ध् इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– नि बन्ध् य त् ए, 'अनिदितां हल उपधायाः क्ङिति' (अष्टाध्यायीसूत्रपाठः 6/4/24) इत्यनेन सूत्रेण न् इत्यस्य लोपसंज्ञकमदर्शनम्– नि ब ध् य त् ए– निबध्यते।

प्रविलीयते– प्र वि इत्युपसर्गपूर्वको ली इत्ययं धातुः– प्र वि ली, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण ली इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– प्र वि ली त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– प्र वि ली त् ए, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण ली इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– प्र वि ली य त् ए– प्रविलीयते।

पर्युपासते– परि उप इत्युपसर्गपूर्वक आस् इत्ययं धातुः– परि उप आस्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण आस् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– परि उप आस् झ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– परि उप आस् झ् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण आस् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– परि उप आस् शप् झ् ए, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– परि उप आस् झ् ए, 'आत्मनेपदेष्वनतः' (अष्टाध्यायीसूत्रपाठः 7/1/5) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अत् इत्ययमादेशः– परि उप आस् अत् ए, 'इको यणचि' (अष्टाध्यायीसूत्रपाठः 6/1/74) इत्यनेन सूत्रेण इ इत्यस्य स्थाने यण् (य्) इत्ययमादेशः– पर् य् उप आस् अत् ए, 'अकः सवर्णे दीर्घः' (अष्टाध्यायीसूत्रपाठः 6/1/97) इत्यनेन सूत्रेण अ आ इत्यनयोः स्थाने दीर्घसंज्ञकः (आ) इत्ययमेकादेशः– पर् य् उप् आ स् अत् ए– पर्युपासते।

उपजुह्वति– उप इत्युपसर्गपूर्वको हु इत्ययं धातुः– उप हु, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण हु इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– उप हु झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हु इत्यस्मात् परः शप् इत्ययं प्रत्ययः– उप हु शप् झि, 'जुहोत्यादिभ्यः श्लुः' (अष्टाध्यायीसूत्रपाठः 2/4/75) इत्यनेन सूत्रेण हु इत्यस्मात् परः शप् इत्यस्य श्लुसंज्ञकमदर्शनम्– उप हु झि, 'श्लौ' (अष्टाध्यायीसूत्रपाठः 6/1/10) इत्यनेन सूत्रेण हु इत्यस्य स्थाने हु हु इत्ययं द्विर्वचनादेशः– उप हु हु झि, 'कुहोश्चुः' (अष्टाध्यायीसूत्रपाठः 7/4/62) इत्यनेन सूत्रेण ह् इत्यस्य स्थाने झ् इत्ययमादेशः– उप झ् उ हु झि, 'अभ्यासे चर्च' (अष्टाध्यायीसूत्रपाठः 8/4/53) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने जश् (ज्) इत्ययमादेशः– उप ज् उ हु झि, 'अदभ्यस्तात्' (अष्टाध्यायीसूत्रपाठः 7/1/4) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अत् इत्ययमादेशः– उप

ज् उ हु अत् इ, 'हुश्नुवोः सार्वधातुके' (अष्टाध्यायीसूत्रपाठः 6/4/87) इत्यनेन सूत्रेण उ इत्यस्य स्थाने यण् (व्) इत्ययमादेशः– उप ज् उ ह् व् अत् इ– उपजुह्वति।

जुह्वति– हु इत्ययं धातुः– उप हु, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण हु इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– हु झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हु इत्यस्मात् परः शप् इत्ययं प्रत्ययः– हु शप् झि, 'जुहोत्यादिभ्यः श्लुः' (अष्टाध्यायीसूत्रपाठः 2/4/75) इत्यनेन सूत्रेण हु इत्यस्मात् परः शप् इत्यस्य श्लुसंज्ञकमदर्शनम्– हु झि, 'श्लौ' (अष्टाध्यायीसूत्रपाठः 6/1/10) इत्यनेन सूत्रेण हु इत्यस्य स्थाने हु हु इत्ययं द्विर्वचनादेशः– हु हु झि, 'कुहोश्चुः' (अष्टाध्यायीसूत्रपाठः 7/4/62) इत्यनेन सूत्रेण ह् इत्यस्य स्थाने झ् इत्ययमादेशः– झ् उ हु झि, 'अभ्यासे चर्च' (अष्टाध्यायीसूत्रपाठः 8/4/53) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने जश् (ज्) इत्ययमादेशः– ज् उ हु झि, 'अदभ्यस्तात्' (अष्टाध्यायीसूत्रपाठः 7/1/4) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अत् इत्ययमादेशः– ज् उ हु अत् इ, 'हुश्नुवोः सार्वधातुके' (अष्टाध्यायीसूत्रपाठः 6/4/87) इत्यनेन सूत्रेण उ इत्यस्य स्थाने यण् (व्) इत्ययमादेशः– ज् उ ह् व् अत् इ– जुह्वति।

विमोक्ष्यसे– वि इत्युपसर्गपूर्वको मुच् इत्ययं धातुः– वि मुच्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण मुच् इत्यस्मात् परो लृट् लकारः, आत्मनेपदम्, मध्यमपुरुषः, एकवचनम्, थास् इत्ययं प्रत्ययः– वि मुच् थास्, 'थासः से' (अष्टाध्यायीसूत्रपाठः 3/4/80) इत्यनेन सूत्रेण थास् इत्यस्य स्थाने से इत्ययमादेशः– वि मुच् से, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण मुच् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– वि मुच् स्य से, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– वि म् ओ च् स्य से, 'चोः कुः' (अष्टाध्यायीसूत्रपाठः 8/2/30) इत्यनेन सूत्रेण च् इत्यस्य स्थाने क् इत्ययमादेशः– वि म् ओ क् स्य से, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने ष् इत्ययं मूर्धन्यादेशः– वि म् ओ क् ष् य से– विमोक्ष्यसे।

परिसमाप्यते– परि सम् इत्युपसर्गपूर्वकः आप् इत्ययं धातुः– परि सम् आप्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण आप् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– परि सम् आप् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– परि सम् आप् त् ए, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण आप् इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– परि सम् आप् य त् ए– परिसमाप्यते।

उपदेक्ष्यन्ति– उप इत्युपसर्गपूर्वको दिश् इत्ययं धातुः– उप दिश्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण दिश् इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– उप दिश् झि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण दिश् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– उप दिश् स्य झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– उप दिश् स्य अन्त् इ, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– उप द् ए श् स्य अन्त् इ, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (अष्टाध्यायीसूत्रपाठः 8/2/36) इत्यनेन सूत्रेण श् इत्यस्य स्थाने ष् इत्ययमादेशः– उप द् ए ष् स्य अन्त् इ, 'षढोः कः सि' (अष्टाध्यायीसूत्रपाठः 8/2/41) इत्यनेन सूत्रेण ष् इत्यस्य स्थाने क् इत्ययमादेशः– उप द् ए क् स्य अन्त् इ, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने ष् इत्ययं मूर्धन्यादेशः– उप द् ए क् ष् य अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– उप द् ए क् ष् य् अ न्त् इ– उपदेक्ष्यन्ति।

यास्यसि– या इत्ययं धातुः– या, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण या इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– या सि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण या इत्यस्मात् परः स्य इत्ययं प्रत्ययः– या स्य सि– यास्यसि।

द्रक्ष्यसि– दृश् इत्ययं धातुः– दृश्, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण दृश् इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– दृश् सि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण दृश् इत्यस्मात् परः स्य इत्ययं प्रत्ययः– दृश् स्य सि, 'सृजिदृशोर्झल्यमकिति' (अष्टाध्यायीसूत्रपाठः 6/1/57) इत्यनेन सूत्रेण ऋ इत्यस्मात् परो अम् (अ) इत्ययमागमः– द् ऋ अ श् स्य सि, 'इको यणचि' (अष्टाध्यायीसूत्रपाठः 6/1/74) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने यण् (य्) इत्ययमादेशः– द् र् अ श् स्य सि, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (अष्टाध्यायीसूत्रपाठः 8/2/36) इत्यनेन सूत्रेण श् इत्यस्य स्थाने ष् इत्ययमादेशः– द् र् अ ष् स्य सि, 'षढोः कः सि' (अष्टाध्यायीसूत्रपाठः 8/2/41) इत्यनेन सूत्रेण ष् इत्यस्य स्थाने क् इत्ययमादेशः– द् र् अ क् स्य सि, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने ष् इत्ययं मूर्धन्यादेशः– द् र् अ क् ष् य सि– द्रक्ष्यसि।

सन्तरिष्यसि– सम् इत्युपसर्गपूर्वकः तॄ इत्ययं धातुः– तॄ, 'लृट् शेषे च' (अष्टाध्यायीसूत्रपाठः 3/3/13) इत्यनेन सूत्रेण तॄ इत्यस्मात् परो लृट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– सम् तॄ सि, 'स्यतासी लृलुटोः' (अष्टाध्यायीसूत्रपाठः 3/1/33) इत्यनेन सूत्रेण तॄ इत्यस्मात् परः स्य इत्ययं प्रत्ययः– सम् तॄ स्य सि, 'आर्धधातुकस्येड् वलादेः' (अष्टाध्यायीसूत्रपाठः 7/2/35) इत्यनेन सूत्रेण स्य इत्यस्यादा इट् (इ) इत्ययमागमः– सम् तॄ इ स्य सि, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ॠ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– सम् त् अर् इ स्य सि, 'आदेशप्रत्यययोः' (अष्टाध्यायीसूत्रपाठः 8/3/59) इत्यनेन सूत्रेण स् इत्यस्य स्थाने ष् इत्ययं मूर्धन्यादेशः– सम् त् अर् इ ष् य सि, 'मोऽनुस्वारः' (अष्टाध्यायीसूत्रपाठः 8/3/23) इत्यनेन सूत्रेण म् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– सं त् अर् इ ष् य सि, 'नश्चापदान्तस्य झलि' (अष्टाध्यायीसूत्रपाठः 8/3/24) इत्यनेन सूत्रेण अनुस्वारस्य () इत्यस्य स्थाने परसवर्णः (न्) इत्ययमादेशः– स न् त् अर् इ ष् य सि– सन्तरिष्यसि।

विन्दति– विद् इत्ययं धातुः– विद्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण विद् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– विद् ति, 'तुदादिभ्यः शः' (अष्टाध्यायीसूत्रपाठः 3/1/77) इत्यनेन सूत्रेण विद् इत्यस्मात् परः श (अ) इत्ययं प्रत्ययः– विद् अ ति, 'शे मुचादीनाम्' (अष्टाध्यायीसूत्रपाठः 7/1/59) इत्यनेन सूत्रेण इ इत्यस्मात् परो नुम् (न्) इत्ययमागमः– व् इ न् द् अ ति, 'नश्चापदान्तस्य झलि' (अष्टाध्यायीसूत्रपाठः 8/3/24) इत्यनेन सूत्रेण न् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– व् इं द् अ ति, 'अनुस्वारस्य ययि परसवर्णः' (अष्टाध्यायीसूत्रपाठः 8/4/57) इत्यनेन सूत्रेण अनुस्वारस्य () इत्यस्य स्थाने परसवर्णः (न्) इत्ययमादेशः– व् इ न् द् अ ति– विन्दति।

लभते– लभ् इत्ययं धातुः– लभ्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण लभ् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– लभ् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– लभ् त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण लभ् इत्यस्मात् परः

शप् (अ) इत्ययं प्रत्ययः– लभ् अ त् ए– लभते।

विनश्यति– वि इत्युपसर्गपूर्वको णश् इत्ययं धातुः– वि णश्, 'णो नः' (अष्टाध्यायीसूत्रपाठः 6/1/63) इत्यनेन सूत्रेण ण् इत्यस्य स्थाने न् इत्ययमादेशः– न् अश्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण न् अश् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– वि न् अश् ति, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण न् अश् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– वि न् अश् य ति– विनश्यति।

निबध्नन्ति– नि इत्युपसर्गपूर्वको बध् इत्ययं धातुः– नि बध्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण बध् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– नि बध् झि, 'क्र्यादिभ्यः श्ना' (अष्टाध्यायीसूत्रपाठः 3/1/81) इत्यनेन सूत्रेण बध् इत्यस्मात् परः श्ना (ना) इत्ययं प्रत्ययः– नि बध् ना झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– नि बध् ना अन्त् इ, 'श्नाभ्यस्तयोरातः' (अष्टाध्यायीसूत्रपाठः 6/4/112) इत्यनेन सूत्रेण आ इत्यस्य लोपसंज्ञकमदर्शनम्– नि बध् न् अन्त् इ– निबध्नन्ति।

आतिष्ठ– आ इत्युपसर्गपूर्वकः स्था इत्ययं धातुः– आ स्था, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण स्था इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– आ स्था सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– आ स्था हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण स्था इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– आ स्था अ हि, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण स्था इत्यस्य स्थाने तिष्ठ् इत्ययमादेशः– आ तिष्ठ् अ हि, 'अतो हेः' (अष्टाध्यायीसूत्रपाठः 6/4/105) इत्यनेन सूत्रेण हि इत्यस्य लुक्संज्ञकमदर्शनम्– आ तिष्ठ् अ– आतिष्ठ। इति।।

**सन्दर्भाः**


1. अष्टाध्यायीसूत्रपाठः (पाणिनिमुनिप्रणीतः)– सम्पादकः– पण्डित ब्रह्मदत्त जिज्ञासु, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
2. धातुपाठः (पाणिनिमुनिप्रणीतः)– सम्पादकः– पण्डित ब्रह्मदत्त जिज्ञासु, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
3. अष्टाध्यायीभाष्यम् (प्रथमावृत्तिः), त्रयो भागाः– लेखकौ– पण्डित ब्रह्मदत्त जिज्ञासु, प्रज्ञादेवी व्याकरणाचार्या, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
4. माधवीया धातुवृत्तिः (सायणविरचिता)– सम्पादकः– विजयपालो विद्यावारिधिः, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
5. पारिभाषिकः– व्याख्याकारः– आचार्य प्रद्युम्न, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
6. वार्त्तिकप्रकाशः– लेखकः– आनन्दप्रकाश मेधार्थी, प्रकाशकः– चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।
7. काशिका (वामनजयादित्यविरचिता)– सम्पादकः– विजयपालो विद्यावारिधिः, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
8. व्याकरणमहाभाष्यम् (महर्षिपतञ्जलिमुनिविरचितम्, प्रदीपोद्द्योतटीकाद्वयसहितम्), षड् भागाः– सम्पादकः– श्री भार्गव शास्त्री, प्रकाशकः– चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।